ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका
Half Yearly Sanskrit Research Journal
Vol. IX Apr,2016 - Sept,2016 No.1
वर्षम् – ९, अप्रेल २०१६ – सितम्बर २०१६, अङ्कः – प्रथमः

# प्राचीसुधा

## *PRACI SUDHA*

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च
डॉ.विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा
PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

ISSN 2249 - 2313


# पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्

Purusottam Research Academy of Indology

Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588

E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com



## संरक्षका:

श्रीमहन्त: डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराज:, सुखचर: कोलकाता, श्रीमहन्त: श्रीरामकृष्णदासमहाराज:, पुरी, श्रीमहन्त: श्रीश्रीनिवासदासमहाराज:, पुरी, त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराज:, पुरी

## परामर्शदातृमण्डलम्

प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपति:), प्रो.अद्वैतचरणधल:, प्रो.रघुनाथपण्डा, प्रो.गङ्गाधरपण्डा(कुलपति:), प्रो.प्रफुल्लकुमारमिश्र:(कुलपति:), प्रो.विक्रमकुमार:, प्रो.चन्द्रशेखरमिश्र:, प्रो.विन्ध्येश्वरप्रसादहिमांशु:, प्रो.ललितकुमारसाहु:, महामहोपाध्यायस्त्रिपाठी डॉ.सुधाकराचार्य:, श्रीज्ञानेन्द्रत्रिपाठी, डॉ.शत्रुघ्नपाणिग्राही, प्रो.नागवरप्रसाद राव चन्द्रपाटी, प्रो.केशवचन्द्रदाश:

## सम्पादकमण्डलम्

प्रो.प्यारीमोहनपट्टनायक:, प्रो.हरेकृष्णमहापात्र:, प्रो.सूर्यमणिरथ:, डॉ.काह्नुचरणपण्डा, प्रो.प्रभातरञ्जनमहापात्र:, प्रो.व्रजकिशोरनायक:, डॉ.वसन्तकुमारमिश्र:, डॉ.युधिष्ठिरसाहु:, डॉ.नरेशचन्द्रदाश:, डॉ.विश्वनाथस्वाईं

## सम्पादक: सञ्चालकश्च

डॉ.विश्वनाथस्वाईं


## सम्पादकीयम्

ॐ "तन्मे मन: शिवसङ्कल्पमस्तु" इति श्रुति: । "मन एव मनुष्याणां कारणं बन्धमोक्षयो: । बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मन: ।।" इति स्मृति: । मनोविषय: यदि प्रत्यगात्मदर्शनमात्रं स्यात् तर्हि विश्वऽस्मिन् विश्वे सर्वत्रैव प्रसन्नता मङ्गलञ्च । प्रत्येगात्मदर्शनानुकूलता काव्यशास्त्रविनोदेन सम्भवति । शास्त्रमतिर्हि फलत: अध्यात्मरति: । अत: अद्वेषरागिणां ये विचारा: परिलक्षिता: तदत्र अन्ताराष्ट्रियमूल्याङ्कितायां पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य षण्मासिकिसंस्कृतशोधपत्रिकायां प्राचीसुधायां रमन्ते । "प्राचीसुधा"-संस्कृतशोधपत्रिकाया: अयं सप्तदशबिन्दु: (वर्षम्-९, अङ्क:-१, अप्रेल-२०१६ – सितम्बर-२०१६) । प्रकाशनमिदं सर्वजनहृद्यं भवेदिति ।

विदुषां वशंवद:

डॉ.विश्वनाथस्वाईं

सम्पादक: सञ्चालकश्च, प्राचीसुधा<br>
तथा च महासचिव:,<br>
पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

श्रीजगन्नाथपुरी<br>
०.०९.२०१६<br>
(महालया)

विनोद मेहेर

# विषयसूची

| पृष्ठाङ्काः | विषयाः | लेखकाः |
| --- | --- | --- |
| ३. | को वामनः | महामहोपाध्यायत्रिपाठी डॉ.सुधाकराच |
| ४. | आधुनिकयुगेऽभिज्ञानशाकुन्तलस्य प्रासङ्गिकता | डॉ.पूनमलखनपाल |
| ८. | वैदिकवाङ्मये पर्जन्यदेवः | डॉ.शत्रुघ्नपाणिग्राही |
| १३. | ईशावास्योपनिषदि मोक्षः | डॉ.विजकुमारः |
| १४. | ब्रह्मसूत्रे पुनर्जन्म | डॉ.दिनेशपालः |
| १५. | स्कान्दी उत्क्रान्तिः | डॉ.सन्तोष कुमारी |
| १६ | श्रीनिम्बार्काचार्यद्वैताद्वैतमते पदार्थविमर्शः | कैलाशचन्द्रमिश्रः |
| १९. | भासनाटकेषु गुप्तचरप्रबन्धनम् | डॉ.जयप्रकाशनारायणः |
| २२. | गरुडमहापुरणेऽन्तराभवः | डॉ.राजबीरः |
| २५. | वामनपुराणे मूर्त्तिकला | श्रीमती पारुल मित्तल |
| २६. | माहेश्वरसूत्राणां वेदमूलकत्वम् | प्रो.विनोद्कुमार झा |
| ३१. | शरीरतत्त्वम् | डॉ.युधिष्ठिरसाहुः |
| ३४. | संस्कृतकाव्येषु योगतत्त्वचर्च्चा | डॉ.वसन्तकुमारमिश्रः |
| ३७. | सामवेदे वैधिकशान्तिः | प्रो.चन्द्रशेखरमिश्रः |
| ४१. | दैनन्दिनजीवने लोकाचारः | माखन दासः |
| ४७. | उपनिषत्सु शिक्षणपद्धतयः | डॉ.निर्मलापाणिग्राही |
| ५१. | प्राचीनभारते प्रोद्योगिकी शिक्षा | डॉ.वृन्दावनपात्रः |
| ५७. | संस्कृत-वाग्योगाः | डॉ.कर्णसिंहः |
| ६१. | श्रीजगन्नाथनवकलेवरब्रह्मकमलस्तोत्रम् | पं.वेणुधरपरिड़ा |
| ६४. | साहित्ये स्मृत्यालोकः | डॉ. जयश्री चट्टोपाध्याय |
| ६८. | वामनपुराणे सरस्वती | डॉ.संगीता अग्रवाल |
| ७०. | कृदन्ते वाक्यविज्ञानम् | दाञ्छानिधि खमारी |
| ७२. | धर्मस्थानं कोणार्कतीर्थक्षेत्रम् | डॉ.दयानिधिमिश्रः |
| ७६. | Declaration | |

—०—

विनोद कु

# माहेश्वरसूत्राणां वेदमूलकत्वम्

## (लघुशब्देन्दुशेखरस्य परिप्रेक्ष्ये)

*प्रो.विनोदकुमार झा*

यथा वयं जानीमो यत् वैयाकरणसिद्धान्तकौमुद्या व्याख्या प्रौढमनोरमाग्रन्थो विद्यते । यथा - प्रौढमनोरमायाः मङ्गलाचरणं-

"ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः । सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम् ।।" तथैव प्रौढमनोरमाया अंशविशेषं स्वीकाराद् अंशविशेषाचास्वीकारात् मनोरमोमार्द्धदेहस्य लघुशब्देन्दुशेखरस्य रचयित्रा महावैयाकरणेन नागेशभट्टेन सिद्धान्तकौमुद्याः प्रतीकं "माहेश्वराणि" इत्यादाय पूर्वं जिज्ञासा कृता यदाम्नायसाम्नायशब्दयोर्वेदस्यैव कृते प्रयोगो दृश्यते, चतुर्दशसूत्र्यामप्ययं व्यवहारो दृश्यते, किमयं व्यवहारो युक्त आहोस्विद् अयुक्तः ? न च "चन्द्रोदये विताने च स्यादाम्नायोऽन्वये श्रुतौ"[१] इति कोशाद् आम्नायशब्दस्य नानार्थकत्वेन "चतुर्दशसुत्र्याम्" अप्याम्नायशब्दस्य प्रयोगः स्यादिति वाच्यम्, आम्नायशब्दस्य नानार्थकत्वेऽपि "चतुर्दशसुत्र्याम्" आम्नायशब्दस्य प्रयोगाऽप्रसिद्ध्या वेदार्थकत्वस्यैव प्रसिद्धेः ।

अत्र शेखरः—ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इति व्यवहारानुपत्तिः, आम्नायसाम्नायशब्दयोर्वेदे एव प्रसिद्धेः ? इत्यत आह-माहेश्वराणीति । महेश्वरादागतानीत्यर्थः । महेश्वरप्रसादलब्धानीति फलितम् । एवञ्चैवभानुपूर्विका श्रुतिरेवैषा । तत्प्रसादात् पाणिनिना लब्धा । श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम्[२] । चतुर्दशसूत्राणि महेश्वरप्रसादलब्धानि सन्ति, न तु प्रोक्तानि । "महेश्वर" शब्दात् "तत आगतः"[३] इति सूत्रेण अण्प्रत्ययः महेश्वरादधिगतानीति । पाणिनिव्याकरणमपि वेदाङ्गत्वेन मन्यते, यतो हि व्याकरणस्यास्य महेश्वरप्रसादलब्धा चतुर्दशसूत्री श्रुतिरेव । भगवतः पाणिनेः सूत्राणां प्रायेण प्रत्याहारद्वारा प्रयोगसाधुत्वसम्पादकत्वेन प्रत्याहारस्य च वर्णसमाम्नायमूलकत्वेन श्रुतिमूलकत्वमस्य पाणिनिव्याकरणस्य । अत एव अस्य वेदाङ्गत्वे न संशयः । "अस्यैव वेदाङ्गत्वम्" इति मूले एवकारोऽप्यर्थको बोध्यः । यथा "घटे एव प्रसिद्धः", "अयमेव तदन्तविधिं ज्ञापयति" इत्यादौ एवकारस्य अप्यर्थकत्वम् । तथाऽत्रापि ।

केचित् विशेषणसङ्गतमेवकारं वर्णयन्तः पाणिनिव्याकरणस्यैव वेदाङ्गत्वं मन्यन्ते । तत् तु वाग्विलासमात्रम् । "अस्यैव" इत्यत्र उपादीयमानस्य एवकारस्य विशेषणसङ्गतत्वप्रतिपादनमपि भ्रममूलकम्, एवकारस्य विशेष्यसङ्गतत्वेन विशेषणसङ्गतत्वाभावात् । अन्यत्रपठितस्य एवकारस्य अन्यत्रसन्निवेशेन अर्थाभिधाने महती अनर्थपरम्परा उदीयात् । श्रुतिमूलकत्वात् पाणिनीये व्याकरणे वेदाङ्गत्वशङ्काऽपि नास्ति इत्याशयेन "अस्यैव वेदाङ्गत्वम्" इत्युक्तम् । अन्यथा श्रुतिमूलकतया अस्यैव वेदाङ्गत्वमिति कल्पनायां तु ज्योतिषादेः वेदाङ्गत्वानापत्तेः, तस्य श्रुतिमूलक-त्वाभावात्[४] । [illegible] शेखरकृता पाणिनिशिष्यप्रणीतायाः पाणिनिशिक्षायाः प्रमाणमप्युद्धृतम् -

"येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः [५] ।।"

[illegible] महेश्वर आचार्यः । अत्र प्रमाणम् - "लण्सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति व्याख्यानत इति"[६] इत्यादौ आचार्यपदेन महेश्वरः । अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदमेव स्फुटीभविष्यति ।

अत्रायं प्रश्नः समुपस्थितो भवति यच्चतुर्दशसूत्राणां यदि श्रुतित्वं मन्यते तर्हि तेषां खण्डनं कथं भाष्यकृता कृतम् ? नहि श्रुतेः प्रत्याख्यानं भवति न वा संगतं समाधानं शेखरकृता क्रियते ।

उत्तरम् - अत्र उत्तररूपेण शेखरकारो लिखति - "ञमङणनम्" इत्यत्र मकारप्रत्याख्यानपरं भाष्यं किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम् । सर्वत्र प्रत्याख्यानमेवम्परमेव अन्यथा अङ्गानामपि परायणे धर्मश्रवणेन तत्र पाणिनिव्यासप्रत्याख्यानस्याप्यसङ्गतिः स्यात्[७] ।

अतीवरमणीयं व्याख्यानं नागेशभट्टेनात्र सन्दर्भे कृतम् । नागेशभट्टस्येदं कथनं सर्वथा साधु विद्यते, यन्महाभाष्यकारेण सूत्रस्य खण्डनं न कृतम्, अपितु विचारितं यदस्य सूत्रस्य दृष्टफलमर्थात् प्रत्यक्षफलं विद्यते न वा । अप्रत्यक्षफलन्तु विद्यत एव । सर्वत्र महाभाष्ये यत्र सूत्रस्य सूत्रांशस्य वा प्रत्याख्यानं कृतं तत्र अयमेवाशयः । यथा हि वेदपारायणेन पुण्यं भवति, तथैव वेदांगस्य पारायणेनापि पुण्यं जायते पुनः वेदाङ्गव्याकरणावयवसूत्रस्य प्रत्याख्यानं न कथमपि सङ्गतम् । अत्र पुनः नागेशभट्टेन प्रमाणं प्रस्तूयते । तदुक्तं "इको यणचि" सूत्रे –

"सामर्थ्ययोगान्नहि किञ्चिदत्र, पश्यामि शास्त्रे यदनर्थकं स्यात्" ।

किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथाऽनर्थकं न किञ्चिद् इति तदर्थः । वृद्धिसूत्रस्थे "वर्णेनाप्यनर्थकेन न भवितव्यम्" इति भाष्यग्रन्थेऽनर्थकत्वं, बोध्यार्थकत्वं, बोध्यार्थराहित्यरूपमिति न निष्प्रयोजनस्वरूपानर्थक्येन तत्र तत्र

प्रत्याख्यानपरभाष्याऽसङ्गतिः[८]। अर्थात् अर्थरहितानि वचनानि यथा लोके तथा अत्रापि इति शङ्कायाः निरासाय भाष्यकृता एको वर्णोऽप्यनर्थकोऽत्र शास्त्रे नास्ति, सूत्रस्य तु आनर्थक्यस्य का चर्चा । प्रत्याख्यानस्थलेऽपि बोध्यार्थराहित्यरूपमानर्थक्यं नास्ति इति न क्वचिदपि बोध्यार्थराहित्यरूपमानर्थक्यमित्यभिप्रायकेण "वर्णेनाप्यनर्थकेन न भवितव्यम्" इत्यनेन न विरोधः[९] ।

भाष्यकृता यदि खण्डनदृष्ट्या प्रत्याख्यानं कृतं स्यात्तर्हि "इको यणचि" इति सूत्रे तेनेदं न कथितं स्यादत्र सामर्थ्ययोगात् साधुत्वप्रतिपादने शक्तत्वात् लेशमात्रमपि अनर्थकं नास्ति । किञ्चित्सूत्रं दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवद् भवति, सर्वथाऽनर्थकं = व्यर्थं नं किमपि विद्यते । एवं विचार्य शुद्धाऽदृष्टार्थमेवेत्येवं परम् । अग्रे शेखरकृता पुनरुच्यते ।

अतएव "सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः" इति भाष्यमुपादायोक्तं भर्तृहरिणा –"यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्त्ताऽस्ति, एवमेव वेदपारम्पर्येण स्मर्यमाणः" इति । आधुनिकः शरीरी । पुष्पितत्वं तन्मूलकशब्दशास्त्रद्वारेण शब्दप्रयोगेण च फलितत्वम् । उक्तञ्चैच्चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृत-काशिकायाम् –

"नृत्तावसाने नटराजराजो, ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्[१०] ।।

पुनश्च – "अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् । धात्वर्थं समुपादिष्टं पाणिन्यादिष्टसिद्धये ।।" अर्थात् धात्वर्थ = धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम् "अनुबन्धकरणार्थश्च वर्णानामुपदेशः" इत्युक्तं भाष्ये । अत्र करणशब्दप्रयोगेण अनुबन्धानां सादित्वं सूचितम् । तत्कारणञ्च उपदेशकर्तृकमेव, प्रत्यासतेः । तेन अनुबन्धव्यतिरिक्तस्य सर्वस्य अनादित्वं सूचितम् [११] ।

माहेश्वरसूत्राणां विषये नागोकृतमिदं प्रामाणिकं व्याख्यानं सर्वातिशायि विद्यते माहेश्वरसूत्रविषयकं भाष्यकृतव्याख्यानमेव भर्तृहरिणापि विशेषरूपेण व्याख्यातम् । "पुष्पितः फलितः" इति सिद्धक्रियाद्वयमत्र । प्रथमं पुष्पमायाति, ततः फलमुद्भूतं भवति । पुष्पं विना फलं न संभवति । अपवादरूपेण यदि क्वचिद् उदुम्बरादौ दृश्यते तदन्यत् । यथा – ब्रह्मराशिः यथा चन्द्रतारकादिभिः शोभते अर्थात् ब्रह्मणः एव ऐश्वर्यद्योतकाश्चन्द्रतारकाः तथैव माहेश्वरसूत्राण्यपि शब्दब्रह्मणः सन्तीति । भर्तृहरिणा यदुक्तं तत्स्पष्टतरम् । अस्याक्षरसमाम्नायस्य कोपि मनुष्यः कर्ता नास्ति । माहेश्वरसूत्रमूलकं पाणिनीयं व्याकरणम्



व्याकरणमूलकमेव शब्दप्रयोगः शब्दसाधुत्वज्ञानम् । एतच्चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृतकाशिकायां एतत्पद्यमुक्तम् । अत्र "ननाद" इत्यन्तर्भावितण्यर्थो तद्धातुः । ढक्कां नादयामास । नवपञ्चवारं चतुर्दशकृत्वः । एतच्छिवढक्कोत्थितं वर्णजालं शिवसूत्रजालतया विमर्शे = जानामि । आर्षस्तङ् । केचित्तु विमर्शे = परामर्शे सति शिवसूत्रसमूहः प्रकटित इत्थं कुर्वन्ति ।

नैयायिकमते वेदस्यापीश्वरकृतत्वान्महेश्वरेण प्रोक्तानीत्यर्थेऽपि न वेदत्वहानिः । चतुर्दशसूत्र्याः ज्ञाने सर्ववेदपरायणजं फलं भाष्ये उक्तम् । व्याकरणमुपक्रम्य "वेदानां वेदः" इति छन्दोगश्रुतिरपि एतत्परैवेति [१२]। अग्रे शेखरकृता अत्र=चतुर्दशसूत्रेषु सनकाद्युद्धरणेच्छयाऽस्य ब्रह्मोपदेशरूपत्वं सूचितम् । तच्च श्रुतित्वाभावे न संगच्छते । "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्युक्तेः [१३] । अर्थात् श्रुतिवाक्येभ्यः = वेदवचनेभ्यः श्रोतव्य = उपदेशो ग्राह्यः ।

ऋक्तन्त्रव्याकरणे शाकटायनोऽपि –"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या उचुः - ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः, तं खल्विममक्षरसमाम्नायमित्यपेक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद्, ब्रह्मराशिः इति । ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको ब्रह्मराशि-रित्यर्थः[१४] ।

अत एव "वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्यः" इति भाष्ये उक्तम् । पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायः=वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तदर्थ=वर्णानाम् उपदेशः = उच्चारणम् । स च उणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्युर्थः । एवञ्च अयम् उपदेशः पाणिनेरन्यकृत इति स्पष्टम् । मन्त्रोपदेश इतिवच्चात्रोपदेशपदप्रयोगः । "एषा ह्याचार्यस्य शैली लक्ष्यतुल्यजातीयांस्तुल्यजातीयेषूपदिशति अचोऽक्षु हलो हल्षु[१५]" इत्यत्र आचार्यपदेन अनादिपुरुषो गृह्यते इति चिदस्थमालाकारः । सम्भवतः अनादिपुरुषः अर्थात् भगवान् महेश्वरः ।

एवं हि माहेश्वसूत्राणां श्रुतित्वं नागेशभट्टेन साधितम् । तत्र महाभाष्य-वाक्यपदीयनन्दिकेश्वरकृतकाशिकापाणिनीयशिक्षा-ऋक्तन्त्रव्याकरणादीनां व्याख्यानानि प्रमाणत्वेनोपन्यस्तानि । वस्तुतः नागेशस्य कथनं सत्यमेव । सर्वेऽपि पौरस्त्यपाश्चात्यभाषाविदः आश्चर्यान्विताः सन्ति यत् संस्कृतव्याकरणस्याधारभूतानि माहेश्वरसूत्राणि केन प्रकारेण व्याकरणनिर्माणे सहायकानि सन्ति । नाऽयं मानवमष्तिकस्य वा विकासवादस्याविष्कारः परिणामो वा अवश्यमेवापौरुषेय-त्वमेतेषाम् ।

केचित्तु एतस्याः शिक्षायाः पाणिनिसम्मतत्वे प्रमाणाभावः, इति

वर्णसमाम्नायस्यापि कर्ता पाणिनिरेव अस्य महेश्वरकर्तृकत्वं भाष्ये क्वापि नोपन्यस्तमिति कथयन्ति ।

---

सन्दर्भसूची -


१. विद्यावाचस्पतेः श्रीब्रह्मदत्तद्विवेदीमहोदयस्य राधिका संस्कृत-हिन्दीव्याख्याद्वयोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या -१९ ।

२. आचार्य-विश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - ११।

३. पाणिनि-अष्टाध्यायीसूत्रपाठः ४/३/७४ ।

४. राधिका संस्कृतहिन्दीव्याख्याद्वयोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या-२० ।

५. पाणिनीयशिक्षा - ५७ ।

६. व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् इति परिभाषोपरि ।

७,८. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या-११।

९. राधिका संस्कृतहिन्दीव्याख्याद्वयोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या-२२ ।

१०. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - ११,१३, १४ ।

११. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - १४।

१२. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - १५।

१३. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - १४।

१४. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या -१५।

१५. आचार्यविश्वनाथशास्त्रिणः हिन्दीटीकोपेते लघुशब्देन्दुशेखरे, पृष्ठसंख्या - २५।


—०—


*अध्यक्ष-व्याकरण विभाग*
*श्रीसोमनाथ संस्कृत युनिवर्सिटी*
*वेरावल, गुजरात-३६२२६*